श्री नृसिंह द्वादशनाम स्तोत्रं

श्री नृसिंह द्वादशनाम स्तोत्रं

अस्य श्रीनृसिंह द्वादशनाम स्तोत्र महामंत्रस्य वेदव्यासो भगवान् ऋषिः, अनुष्टुप् छंदः श्रीलक्ष्मीनृसिंहो देवता श्रीलक्ष्मीनृसिंह प्रीत्यर्थे जपे विनियोगः |

प्रथमं तु महाज्वालो द्वितीयं तूग्रकेसरी |
तृतीयं वज्रदंष्ट्रश्च चतुर्थं तु विशारदः || 1 ||

पंचमं नारसिंहश्च षष्ठः कश्यपमर्दनः |
सप्तमो यातुहंता च अष्टमो देववल्लभः || 2 ||

ततः प्रह्लादवरदो दशमोऽनंतहस्तकः | [नवं]
एकादशो महारुद्रः द्वादशो दारुणस्तथा || 3 ||

द्वादशैतानि नामानि नृसिंहस्य महात्मनः |
मंत्रराज इति प्रोक्तं सर्वपापविनाशनं || 4 ||

क्षयापस्मार कुष्ठादि तापज्वर निवारणं |
राजद्वारे महाघोरे संग्रामे च जलांतरे || 5 ||

गिरिगह्वारकारण्ये व्याघ्रचोरामयादिषु |
रणे च मरणे चैव शमदं परमं शुभं || 6 ||

शतमावर्तयेद्यस्तु मुच्यते व्याधिबंधनात् |
आवर्तयन् सहस्रं तु लभते वांछितं फलं || 7 ||

इति श्री नृसिंह द्वादशनाम स्तोत्रं |